CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋग्वेद संहिता

(वैदिकजीवनभाष्ययुता)

पदपाठ, शब्दार्थ, संस्कृत और
भाषा अनुवाद टिप्पणी और मन्त्रों के
आशय पर व्याख्यान से युक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्र.सं. ६१

रत्न पुस्तक भण्डार
"ग्रीन हाउस"
२७१, माईतीघर
काठमाडौं, नेपाल
फोन : ४-२४०८४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेद-६४०

ऋग्वेद संहिता

(वैदिकजीवनभाष्ययुता)

पदपाठ, शब्दार्थ, संस्कृत और
भाषा अनुवाद टिप्पणी और मन्त्रों के
आशय पर व्याख्यान से युक्त

प्रथम मण्डल : षष्ठम खण्ड

सम्पादक
शिवनाथ आहिताग्नि
पं० शंकरदत्त शास्त्री

NAG PUBLISHERS
नाग प्रकाशक
११ए/यूए, जवाहर नगर, दिल्ली-७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाग प्रकाशक
(१) ११ए/यू. ए. जवाहरनगर, दिल्ली-७
(२) ८ ए/यू. ए. ३ जवाहर नगर, दिल्ली-७
(३) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०

ISBN 81-7081-246-1(SET)

Acc. 25021
29058

प्रथम संस्करण १९०४
द्वितीय संस्करण १९९१

मूल्य: रु०

श्री नागशरण सिंह द्वारा नाग प्रकाशक, जवाहर नगर, दिल्ली से
प्रकाशित ज्ञान आफसेट, शहजादा बाग, दिल्ली से मुद्रित ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेद ६४०

ऋ० मं० १ सू० १०७

विश्वेदेवादेवताः कुत्सऋषिः ।

विनियोगो लौकिकः ।

सूक्तस्य भावार्थः ।

अस्मद्यज्ञो देवानां प्रसादं प्राप्नोतु, अनुग्रहीतृणां तेषां सुमतिरस्मदभिमुखं परिवर्तताम् यतो वयं दारिद्र्यान्मुक्त्वाऽतिशयेन धनवन्तः स्याम १ अङ्गिरसांगीतैः स्तूयमाना देवा अत्राऽऽगत्यास्मान् रक्षन्तु, इन्द्रो बलैः सह, मरुतो वृष्टिप्रापकैः प्रचण्डवायुभिः सह, अदितिश्च स्वपुत्रैरादित्यैः सहाऽऽगत्याऽस्मभ्यं शरणं ददातु २ इन्द्रो वरुणोऽग्निरर्य्यमा सविता चाऽस्मभ्यं तत् प्रसिद्धं सुखं धारयन्तु यन्नविनश्येत्,एतदेस्मद्भ्यर्थनं मित्रो वरुणोऽदितिः सिन्धुः पृथिवी द्यौश्चाऽऽद्रियन्ताम् ।३।

विश्वेदेवादेवतास्त्रिष्टुप्छन्दः ११।११।११।११।

यज्ञोदेवानांप्रत्येतिसुम्न मादित्यासोभवतामृळयन्तः । आवोऽवाचीसुमतिर्ववृत्या दंहोश्चिद्याव रिवोवित्तरासत् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्ञः	यज्ञः	यज्ञ
देवानाम्	देवानाम्	देवताओं की
प्रति	प्रति +	–
एति	प्रति+एति प्राप्नोतु (लोडर्थेलट्)	प्राप्त हो
सुम्नम्	प्रसादम् (आ०को०)	कृपा को
आदित्यासः	हे आदित्याः ! (जसोऽसुगागमः)	हे आदित्यो
भवत	भवत	आप हों
मृळयन्तः	अनुग्रहीतारः	अनुग्रह करने वाले
आ	आ+	–
वः	युष्माकम्	आपकी
अर्वाची	अस्मदभिमुखी	हमारी ओर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुऽमतिः	कल्याणात्मिका बुद्धिः	कल्याणरूप वाली बुद्धि
वव्रृत्यात्	आ+ववृत्यात्, आवर्तताम् (वृतेर्लिङ्व्यत्ययेन परस्मैपदं छान्दसः शपःश्लुश्च)	फिरे
मंहोः	दारिद्र्यात्	दरिद्रता से
चित्	अपि	भी
या	या	जो
वरिवोवित्ऽतरा	अतिशयेन धनस्य प्रापयित्री (वरिवइतिधननाम निघं० २।१०)	खूब धनके दिलाने वाली
असत्	भवेत् (अस्भुविलेटश्चडागमः	हो

संस्कृतार्थः।

यज्ञो देवाना प्रसादं प्राप्नोतु, हे अदितयाः! (यूयमस्माकम्) अनुग्रहीतारो भवत, युष्माकं कल्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णात्मिका बुद्धिरस्मदभिमुखमावर्त्ततां या(अस्मान्) दारिद्र्यादपि (मोचयित्वा)अतिशयेन धनस्य प्राप-यित्री भवेत् ॥ १ ॥

भाषार्थः ।

यज्ञ देवताओं की कृपा को प्राप्त हो,हे आदित्यो! आप (हमारे) अनुग्रह कर्ता हों, आपकी कल्याण वाली बुद्धि हमारी ओर फिरे जो (हमको) दरिद्रता से भी (छुडाकर) खूब धन के दिलाने वाली हो ॥१॥

विश्वेदेवादेवतास्त्रिष्टुप्छन्दः ।११।११।११।११

उपनोदेवाअवसागमन्त्वङ्गिर-सांसामभिःस्तूयमानाः । इन्द्रइ-न्द्रियैर्मरुतोमरुद्भि रादित्यैर्नोअ-दितिःशर्म्मयंसत् ॥ २ ॥

उप	प्रति	की ओर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नः	अस्मान्	हम को
देवाः	देवाः	देवता
अवसा	रक्षणेन	रक्षा के साथ
आ	आ+	--
गमन्तु	आ+गमन्तु, आगच्छन्तु (शपोलुक्)	आवें
अङ्गिरसाम्	अङ्गिरसाम्	अंगिराओं के
सामऽभिः	गीतैः	गीतों से
स्तूयमानाः	स्तूयमानाः	स्तुतिकियेजातेहुए
इन्द्रः	इन्द्रः	इन्द्र
इन्द्रियैः	वीर्यैः	बलों के साथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मरुतः	मरुतः	मरुत
१ मरुत्भिः	प्रचण्डवातैः (सा०भा०)	प्रचंडवायुओं के साथ
आदित्यैः	आदित्यैः	आदित्यों के साथ
नः	अस्मभ्यम्	हमारेताईं
अदितिः	अदितिः	अदिति
शर्म्म	शरणम्	शरण को
यंसत्	यच्छतु (लेट्यडागमेसिप्)	दे

संस्कृतार्थः।

अङ्गिरसां गातैः स्तूयमाना देवा अस्मान् प्रति रक्षया (सह) आगच्छन्तु, इन्द्रो वीर्य्यैः (सह) मरुतः प्रचण्डवातैः [सह] अदितिः [च] आदित्यैः [सह] अस्मभ्यं शरणं दद्यात् ॥ २ ॥

भाषार्थः।

अंगिराओं के गीतों से स्तुति किये जाते हुए देवता हमारी ओर रक्षा के साथ आवें, इन्द्र बलों के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साथ, मरुत प्रचंड वायुओं के साथ, (और) अदिति आदित्यों के साथ हमारे ताईं शरण को दें ॥ २ ॥

(१) प्रचण्ड वायु, मेघ के लाने वाली होती है।

विश्वेदेवादेवतास्त्रिष्टुप्छन्दः।११।११।११।११।

तन्नइन्द्रस्तद्वरुणस्तद्ग्नि स्त-
ष्ट्यर्यमातत्सविताचनोधात् । त-
न्नोमित्रोवरुणोमामहन्ता मदितिः
सिन्धुःपृथिवीउतद्यौः ॥ ३ ॥

तत्	तत् (प्रसिद्धम्)	उस (प्रसिद्ध) को
नः	अस्मभ्यम्	हमारे लिये
इन्द्रः	इन्द्रः	इन्द्र
तत्	तत्	उस को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरुणः	वरुणः	वरुण
तत्	तत्	उस को
अग्निः	अग्निः	अग्नि
तत्	तत्	उस को
अर्य्यमा	अर्य्यमा	अर्य्यमा
तत्	तत्	उस को
सविता	सविता	सविता
चनः	सुखम् (आ० को०)	सुख को
धात्	धारयतु (लोडर्थेलुङ्यडभावः)	धारण करे
तत्	एतत् (एकारलोपश्छान्दसः)	इस को
नः	अस्माकम्	हमारी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्रः	मित्रः	मित्र
वरुणः	वरुणः	वरुणः
समाहन्ताम्	आद्रियन्ताम्	आदर करें
अदितिः	अदितिः	अदिति
सिन्धुः	सिन्धुः	समुद्र
पृथिवी	पृथिवी	पृथिवी
उत	च	और
द्यौः	द्यौः	द्यौ

संस्कृतार्थः।

अस्मभ्यं तत्प्रसिद्धं सुखमिन्द्रस्तद्वरुणस्तदर्य्यमा तत्सविता [च] धारयतु, एतदस्माकम् (अभ्यर्थनम्) मित्रोवरुणोऽदितिः सिन्धुः पृथिवी द्यौश्चाऽऽद्रियन्ताम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाषार्थः ।

हमारे लिये उस (प्रसिद्ध) सुख को इन्द्र, उसको वरुण, उसको अग्नि, उसको अर्य्यमा (और) उसको सविता धारण करें, इस हमारी (प्रार्थना) को मित्र, वरुण, अदिति, समुद्र पृथिवी और द्यौ आदर करें ॥ ३ ॥

वह प्रसिद्ध सुख जो विनाश को न प्राप्त हो अर्थात् आत्मसुख।

इति सप्ताधिकशततमं सूक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋ०मं०१ सू०१०८।

इन्द्राग्नीदेवते कुत्सऋषिः।

विनियोगो लौकिकः।

सूक्तस्य भावार्थः।

विद्युत्तापशक्त्यभिमानिनाविन्द्राग्नी सूर्य्यरूपं रथमारुह्याऽस्मत्समीपमागच्छतामस्माभिर्निष्पीडितं सोमं च पिबताम्।१। इन्द्राग्नीदं सम्पूर्णं भुवनं व्याप्य तिष्ठेते, अस्माकं सोमस्त्वल्पः, अतःप्रार्थ्यते यावदिदं विस्तीर्णं गहनं च भुवनं विद्यते तावानस्मत्सोमो भवतु यइन्द्राग्न्योर्मनसे पर्याप्तःस्यात्।२। तमोरूपं पापरूपं च वृत्रं नाशयन्ताविन्द्राग्नी कल्याणकरमेकंखलु नाम धृतवन्तौ,अतस्तौ सम्भूयाऽऽगच्छतः सम्भूयचोपविश्याऽस्माकं सोमं पिबतः।३। आवां पत्नी यजमानावग्नीन् प्रदीप्य हवींष्यक्त्वा बर्हिस्त्वाऽऽस्तीर्य गृहीतस्रुचौ तिष्ठावः,अतोऽस्मत्परिपिक्तैःसोमैस्तुष्टाविन्द्राग्नी कृपयाऽस्मत्समीपमागच्छताम्।४।इन्द्राग्नी सर्वैर्वीरकर्मभिः,सर्वैर्वीररूपैः, सर्वैः पुरातनैः सख्यैश्च सहाऽऽगत्याऽस्मन्निष्पीडितं सोमं पिबताम्।५। यन्मया पूर्वं कथितमासीद् 'वयं सर्वाः पापशक्तीर्युद्धेन जित्वा देवान् सोमेन यजाम एवेति'तां श्रद्धामभिलक्ष्येन्द्राग्नी मम समीपमागच्छतां निष्पीडितं सोमं च पिबताम्।६। यदीन्द्राग्नी स्वगृहे कस्मिँश्चिद् ब्राह्मणे क्षत्रिये वा मोदेते, यद्वा यदु, तुर्वश, द्रुह्यु,अनु,पुरु, इत्येतेष्वार्य्यवंशेषु विद्येते, यद्वोर्ध्वमध्याधोवर्तिन्यां पृथिव्यांस्तः, यद्वा दिवि पृथिव्यां पर्वतौषधिजलेषु विद्येते, यद्वा दिवोमध्ये सूर्य्यस्योदगमे मोदेते, तस्तत्स्थानेभ्य आगत्य मयानिष्पीडितं सोमं पिबताम् ७-१२ एवं सोमंपीत्वेन्द्राग्नी सर्वाणि धनानि जित्वाऽस्मान् प्रापयतः, इदमस्मदभ्यर्थनं मित्रोवरुणोऽदितिः सिन्धुः पृथिवी द्यौश्चाऽऽदियन्ताम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः । ११।११।११।११

यइन्द्राग्नीचितमोरथोवा मभिविश्वानिभुवनानिचष्टे । तेनायातंसरथंतस्थिवांसाऽथासोमस्य पिबतंसुतस्य ॥ १ ॥

यः	यः	जो
१ इन्द्राग्नी०	हे इन्द्राग्नी !	हेइन्द्र(और) अग्नि
चिचऽतमः	अत्यद्भुतः	अत्यन्त अद्भुत
२ रथः	रथः	रथ
वाम्	युवयोः	तुमदोनों का
अभि	अभितः	सब ओर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वानि	सर्वाणि	सब को
भुवनानि	भुवनानि	लोकों को
चष्टे	पश्यति (निघं०३।११)	देखता है
तेन	तेन	उससे
आ	आ+	—
यातम्	आ+यातम्	आओ
सऽरथम्	समानमेकं रथम् ('समानस्य-' इति समानस्य सः)	एक रथको
तस्थिऽवांसा	आरूढौ (लिटः कसुः, आडो-लोपः, सुपामित्याकारः)	चढ़े हुए
पश्च	अनन्तरम्	पीछे
सोमस्य	सोमम् (कर्म्मणि षष्ठी)	सोम को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिबतम्	पिबतम्	पीओ
सुतस्य	सुतं,निष्पीडितम् (")	निचोड़ेहुए को

संस्कृतार्थः।

हे इन्द्राग्नी ! युवयोर्योऽत्यद्भुतोरथोऽभितः सर्वाणि भुवनानि पश्यति (तम्) एकं रथमारूढौ (युवाम्) तेनाऽऽयातम्, अनन्तरं निष्पीडितं सोमं पिबतम् ॥ १ ॥

भाषार्थः।

हे इन्द्र (और) अग्नि ! आप दोनों का जो अत्यन्त अद्भुत रथ चारों ओर सम्पूर्ण लोकों को देखता है, (उस) एक रथ पर चढे हुए आप दोनों उसके द्वारा आवें, फिर निचोड़े हुए सोम को पीवें ॥ १ ॥

(१) इन्द्र और अग्नि अर्थात् विद्युत और उष्णता शक्ति के अभिमानी देवता सदा इकट्ठे रहते हैं। ऋषि प्रत्यक्षमें और वैज्ञानिक पुरुष यन्त्रों द्वारा इस इकट्ठे रूप का अनुभव करते हैं, साधारण मनुष्य को क्रमशः एक एक रूप का ही अनुभव होता है।

(२) इन्द्राग्नी का अद्भुत रथ सूर्य्य है, जो विद्युत और उष्णता का भँडार है। हमारे पास सूर्य्य रश्मियों द्वारा ही कल्याण-कारी विद्युत और ताप पहुंच कर हमारा पालन करते हैं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

यावदि॒दंभुव॑नं॒विश्व॒मस्त्यु॑ रु॒व्य-
चा॑वरि॒मता॑गभी॒रम् । तावाँ॑अ॒यंपा-
त॑वे॒सोमो॑अ॒स्त्व र॑मिन्द्राग्नी॒मन॑-
सेयु॒वभ्या॑म् ॥ २ ॥

१ यावत्	यावत्	जितना
इ॒दम्	इदम्	यह
भुव॑नम्	भुवनम्	लोक
विश्व॑म्	सर्वम्	सम्पूर्ण
अस्ति॑	अस्ति	है
उ॒रु॒ऽव्यचा॑	विस्तीर्णव्यापनम् (व्यचेरसुनिसति सोर्लुकिप्राप्तं व्यत्ययेन सुपामिति डादेशः)	विस्तार के साथ फैला हुआ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरिमता	उरुत्वयुक्तम् (वरिमशब्दान्मतुपि-सति वकारलोपश्छान्दसोविभक्तेरात्वं च)	चौड़ा
गभीरम्	गहनम्	गहरा
तावान्	तावान्	उतना
अयम्	अयम्	यह
पातवे	पातुम् (तुमर्थेतवेन् प्रत्ययः)	पीने के लिये
सोमः	सोमः	सोम
अस्तु	अस्तु	हो
२ अरम्	पर्य्याप्तम् (क्रियाविशेषणम्)	पर्य्याप्त (काफ़ी)
इन्द्राग्नी०	हे इन्द्राग्नी !	हेइन्द्र(और) अग्नि
मनसे	मनसे	मनके ताईं
युवऽभ्याम्	युवाभ्याम् (व्यत्ययेनाऽऽत्वाभावः)	तुम दोनों के लिये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतार्थः।

हे इन्द्राग्नी! यावदिदमुरुत्वयुक्तं गहनं विस्तीर्णव्यापनम्[च]सर्वं भुवनमस्ति तावान् युवाभ्यां पातुमयंसोमोऽस्तु(युवयोः)मनसे पर्य्याप्तः(च भवतु) ॥२॥

भाषार्थः।

हे इन्द्र (और) अग्नि! जितना यह चौड़ा गहरा (और) विस्तार के साथ फैला हुआ सम्पूर्ण जगत् है उतना आप दोनों के पीने के लिये यह सोम हो (और आप के) मन के ताईं पर्य्याप्त (हो)॥ २ ॥

(१) इन्द्र और अग्नि इस सारे विस्तीर्ण गहरे और चौड़े भुवन में व्याप्त हैं और हमारा सोम थोड़ासा है, इसलिये प्रार्थना है कि वह इस संपूर्ण भुवन के समान विस्तार वाला होकर इन्द्र और अग्नि के मन की तृप्ति के लिये पर्य्याप्त हो।

इन्द्राग्नीदेवते त्रिष्टप्छन्दः।११।११।११।११

चक्राथेहिसध्र्यङ्नामभद्रं सध्रीचीनाद्दृचक्षणाउतस्थः। ताविन्द्राग्नीसध्र्यञ्चानिषद्या वृष्णःसोमस्यवृषणाद्वृषेथाम् ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्राथे०	युवां कृतवन्तौ	तुमदोनोंने किया है
हि	खलु	सचमुच
सध्यक्	संयुक्तम्	इकट्ठे को
नाम	नाम	नाम को
भद्रम्	कल्याणम्	कल्याण वाले को
सधीचीना	सहगन्तारौ (स्वार्थेखः, सुपामिति विभक्तेराजादेशः)	साथ चलनेवाले
१ वृचऽहनौ	हे वृत्रस्य हन्तारौ!	हे वृत्रके मारने वालो
उत	च	और
स्थः	स्थः	तुमदोनों हो
तौ	तौ	वे दोनों
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र(ओ)अग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सध्यञ्चा	सहितौ (विभक्तेरात्वम्)	इकट्ठे
निऽसद्य	उपविश्य	बैठकर
वृषणः	वीर्य्ययुक्तम् (कर्म्मणि षष्ठी)	बलसेयुक्तको
सोमस्य	सोमम् (,,)	सोम को
वृषणा	हे वीर्य्यवन्तौ! (विभक्तेरात्वम्)	हे वीर्य्यवालो
आ	आ+	--
वृषेथाम्	आ+ वृषेथाम् अन्तरेसिञ्चेथाम् (ष्वुसेचने व्यत्ययेन ग्रबात्मनेपदंच)	अंदरसींचो

संस्कृतार्थः ।

हे वृत्रस्य हन्तारौ! वीर्य्यवन्तौ ! इन्द्राग्नी! युवां खलु संयुक्तं कल्याणं नाम (स्वी-) कृतवन्तौ, (युवाम्) सङ्गन्तारौ च भवथः,तौ (युवाम्) सहितावुपविश्य वीर्य्यवन्तं सोममन्तरे सिञ्चेथाम् ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाषार्थः ।

हे वृत्र के मारनेवालो ! वीर्य्य से युक्त ! इन्द्र (और) अग्नि ! आप दोनों ने सचमुच कल्याणवाले इकट्ठे नाम को धारण किया है और आप दोनों साथ चलते हैं, वे आप दोनों इकट्ठे बैठकर बलवाले सोम को अंदर सींचें ॥ ३ ॥

(१) इन्द्र और अग्नि अंधकार रूपी वृत्र को नाश करते हैं और इन की उपासना और चिन्तन से पापरूपी वृत्र का भी नाश होता है ।

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

समिद्धेष्वग्निष्वानजाना यतस्रु-
चाबर्हिरुतिस्तिराणा । तीव्रैःसोमैःप-
रिषिक्तेभिरर्वागेन्द्राग्नीसौमनसा-
ययातम् ॥ ४ ॥

समिद्धेषु	प्रदीप्तेषु,	प्रदीप्तों में

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निषु	अग्निषु	अग्नियों में
आनजाना	(हवींषि) अक्तवन्तौ (अञ्जूव्यक्तिम्रक्षणे, लिटः कानच्, विभक्तेरात्वम्)	(हवियाँ) चुपड़ी हैं
यताऽस्रुचा	गृहीतस्रुचौ (विभक्तेरात्वम्)	स्रुच पकड़े हुए
बर्हिः	बर्हिः	बर्हि को
ऊम्०	(पूरणः)	--
तिस्तिराणा	आस्तृतवन्तौ (स्तृञ् आच्छादने, लिटः कानच्, विभक्तेरात्वम्)	बिछाए हुए
तीव्रैः	तीव्रैः	तीखों से
सोमैः	सोमैः	सोमों से
परिऽसिक्तेभिः	परिषिक्तैः	सींचेहुओं से

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्वाक्	अभिमुखम्	सामने
आ	आ +	--
इन्द्राग्नी०	हे इन्द्राग्नी !	हेइन्द्र(और) अग्नि
सौमनसाय	मनस्तोषाय	मनकीतुष्टिकेलिये
यातम्	आ+यातम्	आओ

संस्कृतार्थः ।

हे इन्द्राग्नी ! अग्निषु प्रदीप्तेषु (आवां हवींषि) अक्तवन्तौ बर्हिरास्तृतवन्तौ गृहीतस्रुचौ (च तिष्ठावः) (युवाम्) परिषिक्तैस्तीव्रैः सोमैरस्मदभिमुखं मनस्तोषायाऽऽयातम् ॥ ४ ॥

भाषार्थः ।

हे इन्द्र [और] अग्नि ! अग्नियों के प्रदीप्त होने पर (हम दोनों ने हवियों को) चुपड़ा है, बर्हि को बिछाया है (और) स्रुच लिये हुए (खड़े हैं) आप दोनों सींचे हुए तीखे सोमों के द्वारा हमारे सामने मन की तुष्टि के लिये आवें ॥ ४ ॥

हम दोनों अर्थात यजमान और पत्नी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

यानीन्द्राग्नी चक्रथुर्वीर्याणि या-
नि रूपाणयुत वृष्ण्यानि। यावां प्रत्ना-
नि सख्याशिवानि तेभिः सोमस्य
पिबतं सुतस्य ॥ ५ ॥

यानि	यानि	जिन को
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि
चक्रथुः	युवां कृतवन्तौ	तुमदोनोंनेकियाहै
वीर्याणि	वीरकर्माणि	बीर कर्मों को
यानि	यानि	जिन को
रूपाणि	रूपाणि	रूपों को
उत	च	और

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृष्ण्यानि	वीर्य्यसम्बन्धीनि	वीर्य्यसंबंधियोंको
या	यानि (शेर्लोपः)	जो
वाम्	युवयोः	तुमदोनों की
प्रत्नानि	पुरातनानि	प्राचीन
सख्या	सख्यानि (")	मित्रताएं
शिवानि	कल्याण रूपाणि	कल्याण रूप
तेभिः	तैः	उन से
सोमस्य	सोमम् (कर्म्मणि षष्ठी)	सोम को
पिबतम्	पिबतम्	पीओ
सुतस्य	निष्पीडितम् (")	निचोड़े हुए को

संस्कृतार्थः।

हे इन्द्राग्नी ! युवां यानि वीरकर्माणि कृतवन्तौ यानि च वीर्य्यसम्बन्धीनि रूपाणि (धृतवन्तौ) यानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(च) युवयोः कल्याणरूपाणि पुरातनानि सख्यानि (सन्ति) तैः (सार्धमागत्य)निष्पीडितं सोमं पिबतम्।५।

भाषार्थः।

हे इन्द्र ! (और) अग्नि ! आप दोनों ने जिन वीर कर्मों को किया है और जिन बीरता युक्त रूपों को (धारण किया है और) जो आप दोनों की कल्याणरूप प्राचीन मित्रताएं (हैं) उन के साथ (आकर) निचोड़े हुए सोम को पीओ ॥५॥

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः।११।११।११।११

यदब्रवंप्रथमंबांवृणानोऽयंसोमो असुरैर्नोविहव्यः। तांसत्यांश्रद्धाम-भ्याहियात मथासोमस्यपिबतंसु-तस्य ॥६॥

यत्	यत्	जो
अब्रवम्	अवोचम्	मैंने कहा था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमम्	प्रथमम्	पहिले
वाम्	युवाम्	तुम दोनों को
वृणानः	वृणानः	बरता हुआ
अयम्	अयम्	यह
सोमः	सोमः	सोम
असुरैः	असुरैः	असुरों के साथ
नः	अस्माभिः (तृतीयार्थे षष्ठी)	हम से
विऽहव्यः	स्पर्धनीयः [ऋ०१०।१२८।१]	स्पर्धा किये जाने योग्य
ताम्	ताम्	उस को
सत्याम्	सत्याम्	सच्ची को
श्रद्धाम्	श्रद्धाम्	श्रद्धा को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभि	अभिलक्ष्य	लक्ष रख कर
आ	आ +	–
हि	खलु	सचमुच
यातम्	आ+यातम्	आओ
अध	अनन्तरम्	पीछे

संस्कृतार्थः ।

(हे इन्द्राग्नी !) युवां वृणानः (अहम्) प्रथमं यदवोचम् 'अयं सोमोऽसुरैःसहाऽस्माभिः स्पर्धनीयः, (इति), तां सत्यां श्रद्धामभिलक्ष्य खलु (युवाम्) आयातम्,अनन्तरं निष्पीडितं सोमं पिबतम् ॥ ६ ॥

भाषार्थः ।

(हे इन्द्र और अग्नि !) आप दोनों को बरते हुए जो मैंने पहिले कहा था कि 'यह सोम असुरों के साथ हम से स्पर्धा किये जाने योग्य है' उस सच्ची श्रद्धा को लक्ष रख कर सचमुच आप दोनों आवें फिर निचोड़े हुए सोम को पीवें ॥६॥

"यह सोम असुरों के साथ हम से स्पर्धा किये जाने के योग्य है" अर्थात इस सोम के लिये हम असुरों (पाप की शक्तियों) से

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करेंगे जिससे देवता इस से वंचित न रहें। ऐसा वाक्य देवताओं में सच्ची श्रद्धा होनेसे ही कहा जा सकता है, अनेक रूप धारण करके पाप की शक्तियाँ हमें देवताओं की पूजा करने से रोकती हैं, उनको दबा कर सोम निष्पीडन में कृतार्थ होना सच्ची श्रद्धा से ही हो सकता है।

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

यदि॑न्द्राग्नी॒मद॑थः॒स्वेदु॑रो॒णे यद्

ब्र॒ह्मणि॒राज॑निवायजत्रा। अत॒ःपरि॑

वृषणा॒वाहिया॒त मथा॒सोम॑स्यपिब-

तंसु॒तस्य॑ ॥ ७ ॥

यत्	यत्	जो
इ॒न्द्रा॒ग्नी॒	हे इद्राग्नी !	हेइन्द्र(और)अग्नि
मद॑थः	हृष्यथः (मदीहर्षेव्यत्ययेनशप्)	हर्षित होते हो
स्वे	निजे	अपने में

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुरोणे	गृहे (निघं० ३।४)	घर में
यत्	यत्+वा	अथवा
ब्रह्मणि	ब्राह्मणे	ब्राह्मण में
राजनि	क्षत्रिये	क्षत्री में
वा	वा+	–
यजत्रा	हे यष्टव्यौ! [विभक्तेरात्वम्]	हे पूजनीयो
अतः	अतः+परि	वहां से
परि	+परि	–
वृषणौ	हे वीर्य्यवन्तौ!	हे वीर्य्यवालो
आ	आ+	––
हि	एव	अवश्य
यातम्	आ+यातम्	आओ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतार्थः ।

हे यष्टव्यौ ! वीर्यवन्तौ! इन्द्राग्नी ! यत् (युवाम्) स्वगृहे यद्वा (कस्मिँश्चित्) ब्राह्मणे क्षत्रिये (वा) मोदेथे तस्मात् (मम समीपम्) आयातमेव, अनन्तरं निष्पीडितं सोम पिबतम् ॥७॥

भाषार्थः ।

हे पूजनीय, वीर्यवान इन्द्र (और) अग्नि! जो आप दोनों अपने घरमें अथवा (किसी) ब्राह्मण वा क्षत्रिय में मुदित होरहे हो, वहां से (मेरे पास) अवश्य आओ फिर निचोड़े हुए सोम को पीओ ।७।

" अपने घर" अर्थात जो ब्रह्माण्ड में आपके रहने का स्थान है वहां से अथवा किसी ब्राह्मण वा क्षत्रिय भक्त के स्थान पर हों तो वहां से मेरे पास आवें और मेरे सोम को पान करें, ये वाक्य ऋषि के अत्यन्त प्रेम को सूचित करते हैं ॥

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

यदिन्द्राग्नीयदुषुतुर्वशेषु यद्द्रु-
ह्युष्वनुषुपरुषुस्थः । अतःपरिवृष-
णावाहियात मथासोमस्यपिबतं
सुतस्य ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्	यत्	जो
इन्द्राग्नी०	हे इन्द्राग्नी !	हेइन्द्र(और)अग्नि
यदुषु	यदुषु	यदुओं में
तुर्वशेषु	तुर्वशेषु	तुर्वशों में
यत्	यत्	जो
द्रुह्युषु	द्रुह्युषु	द्रुह्युओं में
अनुषु	अनुषु	अनुओं में
पुरुषु	पूरुषु	पूरुओं में
स्थः	स्थः	विद्यमान हो

संस्कृतार्थः ।

हे वीर्य्यवन्तावित्यन्द्राग्नी! यत् (युवाम्) यदुषु, तुर्वशेषु, यद्द्रुह्युषु, अनुषु पूरुषु (च) स्थः, तस्मात् (मम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समीपम्) आयातमेव, अनन्तरं निष्पीडितं सोमं पिबतम् ॥ ८ ॥

भाषार्थः ।

हे वीर्यवान इन्द्र (और)अग्नि ! जो आप यदुओं में तुर्वशों में जो द्रुह्युओं में अनुओं में और पूरुओं में विद्यमान हो, वहां से (मेरे पास) अवश्य आओ फिर निचोड़े हुए सोम को पीओ ॥८॥

यदु, तुर्वश, द्रुह्यु, अनु और पूरू आर्य्यजाति के क्षत्रिय वंशों के नाम हैं जो ययाति के पांच पुत्रों के नाम से प्रचलित हुए।

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

यदिन्द्राग्नीअवमस्यांपृथिव्यां मध्यमस्यांपरमस्यामुतस्थः । अतःपरिवृषणावाह्यात मथासोमस्यपिबतंसुतस्य ॥ ९ ॥

यत्	यत्	जो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि
अवमस्याम्	अधोवर्त्तिन्याम्	नीचे रहनेवालीमें
पृथिव्याम्	पृथिव्याम्	पृथिवी में
मध्यमस्याम्	मध्यवर्त्तिन्याम्	बिचली में
परमस्याम्	ऊर्ध्ववर्त्तिन्याम्	ऊपर रहनेवालीमें
उत	च	और
स्थः	स्थः	विद्यमान हो

संस्कृतार्थः।

हे वीर्यवन्तावित्यन्द्राग्नी ! यत् (युवाम्) अधो वर्त्तिन्यां मध्यवर्त्तिन्यामूर्ध्ववर्त्तिन्यां च पृथिव्यां स्थः, तस्मात् (ममसमीपम्) आयातमेव, अनन्तरं निष्पीडितं सोमं पिबतम् ॥ ९ ॥

भाषार्थः।

हे वीर्यवान इन्द्र [और] अग्नि ! जो आप दोनों

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीचे की, बिचली और ऊपर की पृथिवी में विद्यमान हो वहां से (मेरे पास), अवश्य आओ फिर निचोड़े हुए सोम को पीओ ॥ ९ ॥

"नीचे की पृथिवी" जिस पर हम रहते हैं "बिचली पृथिवी" अन्तरिक्ष में होने वाले लोक और "ऊपर की पृथिवी" द्यौ में होने वाले लोक ॥

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

यदिन्द्राग्नीपरमस्यांपृथिव्यां मध्यमस्यामवमस्यामुतस्थः । अतः परिह्वषणावाहियात मथासोमस्य पिबतंसुतस्य । १० ।

यत्	यत्	जो
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमस्याम्	ऊर्ध्ववर्त्तिन्याम्	ऊपररहनेवाली में
पृथिव्याम्	पृथिव्याम्	पृथिवी में
मध्यमस्याम्	मध्यवर्त्तिन्याम्	बिचली में
अवमस्याम्	अधोवर्त्तिन्याम्	नीचे रहने वालीमें
उत	च	और
स्थः	स्थः	विद्यमान हो

संस्कृतार्थः।

हे वीर्यवन्तावित्द्राग्नी! यत् युवाम्) ऊर्ध्ववर्त्तिन्यां मध्यवर्त्तिन्यामधोवर्त्तिन्यां च पृथिव्यां स्थः, तस्मात् (ममसमीपम्) आयातमेव, अनन्तर निष्पीडितं सोमं पिबतम् ॥ १० ॥

भाषार्थः।

हे वीर्यवान इन्द्र (और) अग्न! जो आप दोनों ऊपर की बिचली और नीचे की पृथिवीमें हो वहां से (मेरे पास) अवश्य आओ फिर निचोडे हुए सोम को पीओ ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः।११।११।११।११

यदिन्द्राग्नीदिविष्ठोयत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु । अतः परिह्वषणावाहियात मथासोमस्य पिबतंसुतस्य ॥ ११ ॥

यत्	यत्	जो
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र [और] अग्नि
दिवि	दिवि	द्यौ में
स्थः	स्थः	विद्यमान हो
यत्	यत्	जो
पृथिव्याम्	पृथिव्याम्	पृथिवी में
यत्	यत्	जो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्वतेषु	पर्वतेषु	पर्वतों में
ओषधीषु	ओषधीषु	ओषधियों में
अप्ऽसु	अप्सु	जलों में

संस्कृतार्थः ।

हे वीर्यवन्तावित्द्राग्नी ! यत् (युवाम्) दिवि, यत् पृथिव्यां, यत् पर्वतेष्वोषधीष्वप्सु (च) स्थः तस्मात् (ममसमीपम्) आयातमेव,अनन्तरं निष्पीडितं सोमं पिबतम् ॥ ११ ॥

भाषार्थः ।

हे वीर्यवान् इन्द्र (और) अग्नि ! जो आप दोनों द्यौ में जो पृथिवी में जो पर्वतों में ओषधियोंमें(और) जलों में हो, वहां से (मेरे पास) अवश्य आओ फिर निचोड़े हुए सोम को पीओ ॥ ११ ॥

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

यदिन्द्राग्नीउदितासूर्य्यस्य

मध्यंदिवःस्वधयामादयेथे । अतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिह्वषणावाह्यात मधासोमस्य

पिबतंसुतस्य ॥ १२ ॥

यत्	यत्	जो
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि
उत्ऽइता	उद्गमे (सुपामिति डादेशः)	चढ़ने पर
सूर्य्यस्य	सूर्य्यस्य	सूर्य्य के
मध्ये	मध्ये	बीच में
दिवः	दिवः	द्यौ के
स्वधया	स्वेच्छया (आ० को०)	अपनी इच्छा के साथ
मादयेथे०	मोदेथे (चुरादिगणीयोणिच्)	मोद करते हो

संस्कृतार्थः ।

हे वीर्यवन्तावित्यन्द्राग्नी ! यत् (युवाम्) दिवोमध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यस्योद्गमे स्वेच्छया मोदेथे, तस्मात् (ममसपीपम्) आयातमेव, अनन्तरं निष्पीडितं सोमं ॥ १२

भाषार्थः।

हे वीर्यवान इन्द्र (और) अग्नि! जो आप दोनों द्यौ के मध्य में सूर्य के चढ़ने पर अपनी इच्छा से मोद करते हो, वहां से (मेरे पास) अवश्य आओ, फिर निचोड़े हुए सोम को पीओ ॥ १२ ॥

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः।११।११।११।११।

एवेन्द्राग्नीपपिवांसासुतस्य विप्रवास्मभ्यंसंजयतंधनानि। तन्नो मित्रोवरुणोमामहन्ता मदितिः सिन्धःपृथिवीउतद्यौः ॥ १३ ॥

एव	एवम् (सो०भा०)	इस प्रकार
इन्द्राग्नी०	हे इन्द्राग्नी!	हे इन्द्र (और) अग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पपिवांसा	पीतवन्तौ (लिटःक्वसुः)	पीये हुए
सुतस्य	निष्पीडितम् (कर्म्मणिषष्ठी)	निचोडे हुए को
विश्वा	विश्वानि (शेर्लोपः)	सब को
अस्मभ्यम्	अस्मभ्यम्	हमारे लिये
सम्	सम् +	-
जयतम्	सम्+जयतम्	खूब जीतो
धनानि	धनानि	धनों को
तत्	एतत् (एकारलोपश्छान्दसः)	इस को
नः	अस्माकम्	हमारी
मित्रः	मित्रः	मित्र
वरुणः	वरुणः	वरुण
ममहन्ताम्	आद्रियन्ताम्	आदर करें

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदितिः	अदितिः	अदिति
सिन्धुः	सिन्धुः	समुद्र
पृथिवी	पृथिवी	पृथिवी
उत	च	और
द्यौः	द्यौः	द्यौ

संस्कृतार्थः ।

हे इन्द्राग्नी ! एवं निष्पीडितम् (सोमम्) पीतवन्तौ (युवाम्) अस्मभ्यं सर्वाणि धनानि संजयतम्, एतदस्माकम् (अभ्यर्थनम्) मित्रोवरुणोऽदितिःसिन्धुः पृथिवी द्यौश्चाऽऽद्रियन्ताम् ॥ १३ ॥

भाषार्थः ।

हे इन्द्र (और)अग्नि ! इस प्रकार निचोडे हुए (सोम) को पीये हुए आप दोनों हमारे लिये सम्पूर्ण धनों को खूब जीतें, इस हमारी (प्रार्थना) को मित्र, वरुण,अदिति,समुद्र पृथिवी और द्यौ आदर करें॥१३॥

इत्यष्टोत्तर शततमं सूक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋ० मं० १ सू०१०९।

इन्द्राग्नीदेवते कुत्सऋषिः।

विनियोगो लैङ्गिकः।

सूक्तस्य भावार्थः।

मनुष्यः भेषः इच्छन् सन् ज्ञातीन् भ्रातॄंश्च मनसा चिन्तयति, परन्तु देवेभ्योऽन्यः कश्चिदप्यस्य श्रेयस्कर्ता नास्ति, एतद्विचार्य्य बलमिच्छन् कुत्सः अनेन सूक्तेन इन्द्राग्नी स्तौति।१। शुल्कदानेन दारॉल्लब्धुर्जामातुः, विवाहकाले धनं दातुः श्यालाच्चापि इन्द्राग्नी वदान्यतरौ स्तः, अतो मया धनलाभाय सोमप्रदानपूर्वकं नवीनया स्तुत्या इन्द्राग्नी संसेव्यौ। २। आर्य्यपुरुषाः प्रजातन्तुं अच्छेत्स्यमानाः पूर्वजानां शक्तयनुरूपं प्रयतमानाश्च इन्द्राग्न्योःपूजायां समासक्ताः सन्तो मोदन्ते, अतस्तेषां गृहे सोमकुट्टनपाषाणाः दृश्यन्ते।३। अश्विनाविव सहचारिणौ इन्द्राग्नी कामयमानायाः अधिषवणचर्मरूपायाः देव्याः समीपमागत्य सोमेन सह जलानां माधुर्य्यं संयोजयताम् ।४। धनस्य विभजने शत्रोर्हननेच इन्द्राग्नी बलवत्तमौ श्रुतौ स्तः, तौ अस्मदीये यज्ञे बर्हिषि उपविश्य निष्पीडितेन सोमेन मदयुक्तौ भवताम् ।५। इन्द्राग्नी संग्रामे मनुष्येभ्यः अधिकौ स्तः, महिम्ना पृथिव्याः दिवः सिन्धुभ्यो गिरिभ्यो विश्वेभ्योभुवनेभ्यश्च अधिकौ स्तः, ।६। इमे सूर्य्यस्य रश्मयः इन्द्राग्न्येव, एते पूर्वकालेऽस्मत्पितॄन् स्पृष्टवन्तः, इदानीं अस्मानपि स्पृशन्ति, एते यथाऽस्मत्पूर्वजानामर्थं धनानि आहरन्, तान् रक्षितवन्तश्च तथाऽस्मभ्यमपि भवन्तु ।७। शत्रुपुराणां विदारयितारौ वज्रहस्तौ इन्द्राग्नी अस्मभ्यं अभीष्टं ददतां, संग्रामे चाऽस्मान् रक्षताम्, इदमस्मदभ्यर्थनं मित्रो वरुणोऽदितिः सिन्धुः पृथिवी द्यौश्चाऽऽद्रियन्ताम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

विह्यख्यंमनसावस्यइच्छ न्नि-
न्द्राग्नीऋासउतवासजातान्। ना-
न्यायुवत्प्रमतिरस्तिमह्यं सवांधि-
यंवाजयन्तीमतच्चम् ॥ १ ॥

वि	वि +	-
हि	खलु	सचमुच
अख्यम्	वि + अख्यम्, ईक्षितवानस्मि (आ०को०)	मैंने दृष्टि का
मनसा	मनसा	मन से
वस्यः	श्रेयः (वसुशब्दादीयसुन्, टेर्लोपः। ईकारलोप-श्छान्दसः)	भलाई को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इच्छन्	इच्छन्	इच्छा करता हुआ
इन्द्राग्नी०	हे इन्द्राग्नी !	हेइन्द्र(और)अग्नि
ज्ञासः	ज्ञातीन् (औणादिकोऽसुन् प्रत्ययः)	कुटुम्बियों को
उत	अपि	भी
वा	च (आ०को०)	और
सऽजातान्	भ्रातॄन्	भाइयों को
न	न	नहीं
अन्या	अन्यः	दूसरा
युवत्	युवाभ्याम् (सुपामिति विभक्तेर्लुक्)	तुम दोनों से
प्रऽमतिः	अनुगृहीता (ऋ०१।३१।१४)	अनुग्रह करने वाला
अस्ति	अस्ति	है

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मह्यम्	मह्यम्	मेरे लिये
सः	सः	वह
वाम्	युवाभ्याम्	तुम दोनों के लिये
धियम्	स्तुतिम्	स्तुति को
वाजऽय-न्तीम्	बलमिच्छन्तीम्	बल चाहने वाली को
अतक्षम्	तष्टवानस्मि	मैंने रचा है

संस्कृतार्थः।

हे इन्द्राग्नी ! अहं श्रेयः इच्छन् (सन्) ज्ञातीन् भ्रातॄँश्चापि मनसा खलु दृष्टवानस्मि (परन्तु) युवाभ्यामन्यो मह्यं अनुग्रहीता नास्ति,सः (अहम्) बलमिच्छन्तीं स्तुतिं युवाभ्यां तष्टवानस्मि ॥ १ ॥

भाषार्थः।

हे इन्द्र (और) अग्नि ! भलाई की इच्छा करते हुए मैंने सचमुच कुटुम्बियों और भाइयों की ओर भी मन से दृष्टि की (परन्तु) आप से दूसरा मेरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिये अनुग्रह करने वाला नहीं है, उस मैंने बल को चाहने वाली स्तुति को आप के लिये रचा है ॥ १ ॥

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११।

अश्र॑वं॒ हि भू॑रि॒दाव॑त्तरावां॒ विजा॑मातुरु॒तवा॑घास्या॒लात् । अथा॒सोम॑स्य॒ प्रय॑तीयु॒वभ्या॒मिन्द्रा॑ग्नी॒स्तोमं॑ जनयामि॒ नव्य॑म् ॥ २ ॥

अश्र॑वम्	श्रुतवानस्मि (विकरणस्य लुक्)	मैंने सुना है
हि	खलु	सचमुच
भू॒रि॒दाव॑त्ऽतरा	बहुदातृतरौ ('भूरिदाव्नस्तुड्वक्तव्यः' इतितरपस्तुटि सति विभक्तेरात्वम्	अत्यन्त बहुत देने वाले
वा॒म्	युवाम्	तुम दोनों को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विऽजामातुः	अयोग्यात् जामातुः	अयोग्य जंवाई से
उत	अपि	भी
वा	च (आ०को०)	और
घ	(पूरणः)	–
स्यालात्	स्यालात् (स्यँल्लाजानावपतीति यास्कः)	साले से
अथ	इदानीम्	अब
सोमस्य	सोमस्य	सोम के
प्रऽयती	प्रयत्या, प्रदानेन (यास्कः, तृतीयायाः पूर्वसवर्णदीर्घत्वम्)	अर्पण करने से
युवऽभ्याम्	युवाभ्याम् (आत्वाभावश्छान्दसः)	तुमदोनों के ताईं
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोमम्	स्तोत्रम्	स्तोत्र को
जनयामि	निष्पादयामि	रचता हूं
नव्यम्	नव्यम्	नवीन को

संस्कृतार्थः।

हे इन्द्राग्नी ! (अहम्) खलु युवां अयोग्याज्जामातुः स्यालाच्चापि बहुदातृतरौ श्रुतवानस्मि, इदानीं युवाभ्यां सोमप्रदानेन (सह) नव्यं स्तोत्रं निष्पादयामि ॥ २ ॥

भाषार्थः।

हे इन्द्र (और) अग्नि ! सचमुच मैंने आप को अयोग्य जंवाई से और साले से भी अत्यन्त बहुत देने वाला सुना है, अब आप के लिये सोम अपर्ण करने के साथ नवीन स्तोत्र को रचता हूं ॥ २ ॥

अयोग्य जंवाई अपने विवाहके लिये दरिद्री श्वशुर को जो धन देता है और साला विवाहके समय अपनी बहन को जो धन देता है ऐसे धनसे कभी किसी के पूरे नहीं पड़ते, इन्द्राग्नी इन से भी अधिक देने वाले हैं इस लिये उनको प्रसन्न करके उनसे धन मांगना चाहिये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

मा च्छेम रप्सुमीरिति नाधमानाः

पितॄणां शक्तीरनुयच्छमानाः । इन्द्रा-

ग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री

धिषणाया उपस्थे ॥३॥

मा	मा	मत
छेम	छिनदाम (छिदेर्लोडर्थेलडिविकरणस्यलुगडभावश्च)	हम काटें
रप्सुमीन्	(प्रजा-)तन्तून्	(सन्तान की) लड़ी को
इति	इति	ऐसी
नाधमानाः	प्राथयमानाः (नाधृ याच्ञायाम्)	प्रार्थना करते हुए

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितॄणाम्	पितॄणाम्	पितरों की
शक्तीः	शक्तीः	शक्तियों को
अनुऽय-चक्ष्मानाः	अनुरूपं प्रयतमानाः (व्यत्ययेनात्मनेपदम्)	पीछे प्रयत्न करते हुए
इन्द्राग्निऽभ्याम्	इन्द्राग्निभ्याम्	इन्द्र (और) अग्नि के द्वारा
कम्	(पूरणः)	--
वृषणः	वीर्य्यवन्तः	वीर्य्यवान
मदन्ति	मोदन्ते (मदिमोदे, आगमानुशासनस्यानित्यत्वान्नुमभावो व्यत्ययेनपरस्मैपदम्)	मोद करते हैं
ता	एतौ (विभक्तेराकारादेशः)	ये दोनों
हि	एव	ही

TRANSFERRED

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अद्रीः	ग्रावाणौ	सोमकूटनेके पत्थर
अधिषवणायाः	अधिषवणचर्मणः	सोम निचोड़नेके चर्म के
उपऽस्थे	उत्सङ्गे	गोद में

संस्कृतार्थः ।

'(प्रजा-)तन्तून् मा छिनदाम'इति प्रार्थयमानाः पितॄणां शक्तीरनुरूपं प्रयतमानाः (च) वीर्य्यवन्तः (आर्य्यपुरुषाः) इन्द्राग्निभ्यां मोदन्ते (अतः) एवैतौ ग्रावाणौअधिषवणचर्मणः उत्सङ्गे (विद्येते) ॥३॥

भाषार्थः ।

'(सन्तानकी) लड़ी को हम न काटें' ऐसी प्रार्थना करते हुए (और) पितरों की शक्ति के पीछे प्रयत्न करते हुए वीर्य्यवान (आर्य्यपुरुष) इन्द्र(और) अग्नि के द्वारा मोद करते हैं (इसीलिये) ये सोम कूटने के पत्थर चर्म पर (पड़े हैं) ॥ ३ ॥

जैसे हमारे वीर्य्यवान पूर्वज बड़े बड़े शक्तिके कर्म करते थे वैसे ही हम भी करेंगे और हमसे पीछे हमारे पुत्र पौत्रादिक भी करेंगे, इस विचार से आर्य्यपुरुष इन्द्राग्नी की पूजा में तत्पर रहते हैं, इसीलिये उनके घरों में सोम कूटने के पत्थर देखे जाते हैं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

युवाभ्यांदेवीधिषणामदायेन्द्रा-
ग्नीसोममुशतीसुनोति । तावश्विव-
नाभद्रहस्तासुपाणी आधावतंमधु-
नापृङ्क्तमप्सु ॥ ४ ॥

युवाभ्याम्	युवाभ्याम्	तुम दोनों के ताईं
१ देवी	देवी	देवी
१ धिषणा	अधिषवणचर्म (सा०भा०)	सोम कूटने का चर्म
मदाय	मदाय	मद के लिये
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि
सोमम्	सोमम्	सोम को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उशती	कामयमाना	कामना करती हुई
सुनोति	निष्पीडयति (षुञ् अभिषवे)	निचोड़ती है
तौ	तौ	वे दोनों
२ अश्विना	हे अश्विनौ ! (विभक्तेरात्वम्)	हे अश्विना
भद्रहस्ता	हे कल्याणहस्तौ ! (,,)	हे हाथोंमें कल्याण रखनेवालो
सुऽपाणी०	हे शोभनहस्तौ !	हे सुन्दर हाथों वालो
आ	आ +	–
धावतम्	आ+धावतम्, धावित्वाऽऽगच्छतम्	दौड़ कर आओ
मधुना	माधव्येण	मिठास से
पृङ्क्तम्	संयोजयतम् (पृचोसम्पर्के)	संयुक्त करो
अप्ऽसु	अप्सु	जलों में

संस्कृतार्थः ।

हे इन्द्राग्नी ! (युवाम्) कामयमानाऽधिषवण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चर्मरूपा देवी युवाभ्यां मदाय सोमं निष्पीडयति, हे कल्याणहस्तौ ! सुपाणी ! अश्विनौ ! तौ (युवाम्) धावित्वाऽऽगच्छतम्, अप्सु (वर्त्तमानेन) माधुर्य्येण (च सोमम्) संयोजयतम् ॥ ४ ॥

भाषार्थः ।

हे इन्द्र (और) अग्नि ! (आप की) कामना करती हुई सोम कूटने की चर्मरूप देवी आपके ताईं मदके लिये सोम को निचोड़ती है, हे हाथों में कल्याण रखने वालो ! सुन्दर हाथों वाले अश्विनो! वे आप दौड़ कर आओ (और सोम को) जलों के मिठास से मिलाओ ॥ ४ ॥

(१) सोम कूटने के पत्थरों को जिस चर्म पर रखकर सोम निचोड़ाजाता है वह चर्म यहां पर देवीरूपसे चिन्तन किया गया है।

(२) अश्विन जैसे सदा साथ रहते हैं वैसे ही इन्द्र (विद्युत) और अग्नि (ताप) सदा साथ रहते हैं, इसी सादृश्य के कारण इन को अश्विन नाम से पुकारा गया है।

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११

यु॒वामि॑न्द्राग्नी॒वसु॑नोविभा॒गे त॒-

वस्त॑माशुश्रववृत्र॒हत्ये॑ । तावा॒सद्या॑

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बर्हिषियज्ञेअस्मिन् प्रचर्षणीमादये-

थांसुतस्य ॥ ५ ॥

युवाम्	युवाम्	तुमदोनों को
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र(और)अग्नि
वसुनः	धनस्य	धन के
विऽभागे	विभजने	बांटने में
तवःऽतमा	अतिबलिनौ	अत्यन्त बली
शुश्रव	शुश्राव, श्रुतवा-नस्मीत्यर्थः (श्रुश्रवणे लिट्युत्तम-पुरुषैकवचन आकार-स्याऽऽकारश्छान्दसः)	मैंने सुना है
वृचऽहत्ये	शत्रोर्हनने (लिङ्क्यत्ययश्छान्दसः)	शत्रु के मारने में

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तौ	तौ	वे दोनों
आऽसद्य	उपविश्य	बैठ कर
बर्हिषि	बर्हिषि	कुशापर
यज्ञे	यज्ञे	यज्ञ में
अस्मिन्	अस्मिन्	इस में
प्र	प्रकर्षेण	भली प्रकार
चर्षणी०	हे द्रष्टारौ !	हे देखने वालो
मादयेथाम्	मदयुक्तौभवतम्	तुम दोनों मदसे युक्त हो
सुतस्य	निष्पीडितेन (तृतीयार्थे षष्ठी)	निचोड़े हुए से

संस्कृतार्थः ।

हे इन्द्राग्नी ! (अहम्) युवां धनस्य विभजने शत्रोर्हनने (च) अतिबलिनौ श्रुतवानस्मि, हे (सर्वस्य)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रष्टारौ ! तौ (युवाम्) अस्मिन् यज्ञे बर्हिषि उपविश्य निष्पीडितेन (सोमेन) मदयुक्तौ भवतम् ॥ ५ ॥

भाषार्थः ।

हे इन्द्र [और] अग्नि ! मैंने आप को धन-के बांटने में [और] शत्रु के मारने में अत्यन्त बली सुना है, हे (सबके) देखने वालो ! वे आप इस यज्ञ में कुशा पर बैठकर निचोड़े हुए (सोम) से मद-युक्त हों ॥ ५ ॥

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ११।११।११।११

प्रचर्षणिभ्यःपृतनाहवेषु प्रपृथिव्याररिरिचाथेदिवश्च। प्रसिन्धुभ्यः प्रगिरिभ्योमहित्वा प्रेन्द्राग्नीविप्रुवाभुवनाऽत्यन्या ॥ ६ ॥

प्र	प्र+	-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चर्षणिऽभ्यः	मनुष्येभ्यः (निघं०२।३)	मनुष्यों से
पृतनाऽहवेषु	युद्धाऽऽह्वानेषु	युद्ध की ललकारों में
प्र	प्र+	–
पृथिव्याः	पृथिव्याः	पृथिवी से
रिरिचाथे०	प्र+रिरिचाथे, अधिको स्थः (रिचेर्लटि विकरणस्य श्लुः)	बढ़ कर हो
द्विवः	दिवः	द्यौ से
च	च	और
प्र	प्र+	–
सिन्धुऽभ्यः	सिन्धुभ्यः	समुद्रों से
प्र	प्र+	–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गिरिऽभ्यः	पर्वतेभ्यः	पर्वतों से
महिऽत्वा	महिम्ना (सुपामिति तृतीया-या डादेशः)	महिमा द्वारा
प्र	प्र+	-
इन्द्राग्नी०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि
विश्वा	विश्वानि (शेर्लोपः)	सब को
भुवना	भुवनानि (,,)	लोकों को
अति	अतीत्य	अत्यन्त
अन्या	अन्यानि (,,)	औरों को

संस्कृतार्थः ।

हे इन्द्राग्नी ! युवां युद्धाह्वानेषु मनुष्येभ्योऽधिकौ स्थः, (युवाम्) पृथिव्या दिवश्च अधिकौ स्थः, (युवाम्) महिम्ना सिन्धुभ्यः पर्वतेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(च) अधिकौस्थः, (युवाम्) अन्यानि सर्वाणि भुवनानिअतीत्य अधिकौ स्थः ॥६॥

भाषार्थः।

हे इन्द्र (और) अग्नि! आप युद्ध की ललकारों में मनुष्यों से बढ़कर हैं, आप पृथिवी से और द्यौ से बढ़ कर हैं, आप महिमाद्वारा समुद्रों से (और) पर्बतों से बढ़कर हैं, आप दूसरे सम्पूर्ण लोकों से अत्यन्त बढ़कर हैं ॥ ६ ॥

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११।

आभरतंशिक्षतंवज्रबाहू अस्माँ-
इन्द्राग्नीअवतंशचीभिः। इमेनुतेर-
मयःसूर्यस्य येभिःसपित्वंपितरो
नआसन् ॥ ७ ॥

आ	आ +	-
भरतम्	आ + भरतम्, आहरतम् (ह्यस्यभत्वम्)	लाओ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिक्ष॑तम्	दत्तम् (शिक्षतिर्दानकर्म्मा निघं० ३।२०)	देअ
व॒ज्र॒बा॒हू॒०	हे वज्रहस्तौ !	हे हाथों में वज्र रखने वालो
अ॒स्मान्	अस्मान्	हम को
इ॒न्द्रा॒ग्नी॒०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि
अ॒व॒त॒म्	रक्षतम्	रक्षा करो
शची॑भिः	बलैः	बलों द्वारा
इ॒मे	इमे	ये
नु	एव	ही
ते	ते	वे
र॒श्मयः॑	किरणाः	किरणें
सूर्य्य॑स्य	सूर्यस्य	सूर्य्य की

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येभिः	यैः	जिन के साथ
सऽपित्वम्	समवेतत्वम् (षपसमवाये, अस्मादिन् प्रत्ययः, सपेर्भावः सपित्वम्)	संयोग को
पितरः	पितरः	पितर
नः	अस्माकम्	हमारे
आसन्	प्राप्तवन्तः (असगतौ)	प्राप्त हुए थे

संस्कृतार्थः ।

हे वज्रहस्तौ ! इन्द्राग्नी ! [युवां धनम्] आहरतम्, (अस्मभ्यम्) दत्तम्, अस्मान् (च निज-) बलैः रक्षतम्, इमे सूर्य्यस्य किरणाः तएव (सन्ति) यैः सहाऽस्माकं पितरः समवेतत्वं प्राप्तवन्तः ॥ ७ ॥

भाषार्थः ।

हे हाथों में वज्र रखने वाले इन्द्र (और) अग्नि ! आप (धन को) लाओ, (हमें) दो, (और अपने) बलों द्वारा हमारी रक्षा करो, ये सूर्य्य की किरणें

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वही (हैं) जिन के साथ हमारे पितर संयोग को प्राप्त हुए थे ॥ ७ ॥

सूर्य्य की किरणें ही इन्द्र और अग्नि हैं, ये वही किरणें हैं जो पूर्वकाल में हमारे पितरों को स्पर्श करती थीं और अब हमें करती हैं, इन के द्वारा पूर्वजों के साथ हमारा सबंध बना हुआ है।

इन्द्राग्नीदेवते त्रिष्टुप्छन्दः ।११।११।११।११।

पुरन्दराशिच्चतंवज्रहस्ता ऽस्माँ-
इन्द्राग्नीअवतंभरेषु । तन्नोमिचो
वरुणोमामहन्ता मदितिःसिन्धुः
पृथिवीउतद्यौः ॥ ८ ॥

पुरम्ऽदरा	हे पुराणां दारयितारौ ! ('पृ:सर्वयोः-'इति खच प्रत्ययः)	हे गढ़ों के तोड़ने वालो
शिच्चतम्	दत्तम्	देओ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व॒ज्र॒ऽह॒स्ता॒	हे वज्रहस्तौ ! (विभक्तेरात्वम्]	हे हाथों में वज्र रखने वाली
अ॒स्मान्	अस्मान्	हम को
इ॒न्द्रा॒ग्नी॒०	हे इन्द्राग्नी !	हे इन्द्र (और) अग्नि
अ॒व॒त॒म्	रक्षतम्	रक्षा करो
भरे॑षु	सङ्ग्रामेषु (निघं० २।१०)	युद्धों में
तत्	एतत् (एकारलोपश्छान्दसः)	इस को
नः॒	अस्माकम्	हमारी
मि॒त्रः	मित्रः	मित्र
वरु॑णः	वरुणः	वरुण
म॒म॒ह॒न्ता॒म्	आद्रियन्ताम्	आदर करें
अदि॑तिः	अदितिः	अदिति
सिन्धुः॑	सिन्धुः	समुद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथिवी	पृथिवी	पृथिवी
उत	च	और
द्यौः	द्यौः	द्यौ

संस्कृतार्थः ।

हे पुराणां दारयितारौ ! वज्रहस्तौ ! इन्द्राग्नी ! (युवामस्मभ्यमभीष्टम्) दत्तं, सङ्ग्रामेषु (च) अस्मान् रक्षतम्, एतदस्माकम् (अभ्यर्थनम्) मित्रोवरुणोऽदितिः सिन्धुः पृथिवी द्यौश्चाऽऽद्रियन्ताम् ॥ ८ ॥

भाषार्थः ।

हे गढ़ों के तोड़नेवालो ! हाथ में वज्र रखनेवाले इन्द्र (और) अग्नि ! आप (हमें अभीष्ट को) दें (और) युद्धों में हमारी रक्षा करें, इस हमारी (प्रार्थना) को मित्र, वरुण, अदिति, समुद्र, पृथिवी और द्यौ आदर करें ॥ ८ ॥

इति नवोत्तरशततमं सूक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋ०मं०१ सू०११०।

ऋभवोदेवताः कुत्सऋषिः।

विनियोगः-

१—९। एतत्सूक्तं अभिप्लवषळहस्य चतुर्थेऽहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानम् (आ० ७।७।३)

सूक्तस्य भावार्थः।

ऋभुर्विभ्वा वाज इत्येते सुधन्वन आङ्गिरसस्य पुत्राः स्वकर्मणा देवत्वं प्राप्ताः,तेषामर्थमिदं स्तोत्रं मया कुत्सेनोच्चार्य्यते, यच्च पूर्वं सोमेनाऽर्चनं कृतमासीत् तदपि पुनः क्रियते, तेन ते ऋभवोदेवाः अत्र आगत्य विश्वैर्देवैः सह सोमेन तृप्ता भवन्तु ।१। आङ्गिरसाः मम बान्धवाः ऋभवो यदा सोमभागमिच्छन्तो विचरितवन्तः तदा चरितस्य महत्त्वेन सूर्य्यलोकं प्राप्तवन्तः ।२। तत्र सविता तेभ्योऽमृतत्वं दत्तवान् यतस्ते यज्ञेषु सोमभागाकाङ्क्षां प्रकटयन्तस्तत्समीपं गतवन्तः, ते त्वष्टृनिर्मितं चन्द्रमसमिव एकं सोमभक्षणपात्रं यज्ञसौकर्य्याय चतुर्धा कृतवन्तः। ३। सौधन्वना देवकामाः ऋभवःअनवरतं शुभकर्माणि कृत्वा देवपदवीं प्राप्तवन्तः, संवत्सरानन्तरंच यज्ञे देवैः सह भागं लब्धवन्तः ।४। प्रशस्तं देवजन्म याचमानाः देवेषु च यशःकामयमानाः ऋभवः उरुमुखमेकं बृहत् सोमपात्रं चत्वारि लघुपात्राणि कर्तुं मितवन्तः ।५। ये ऋभवः सूर्य्यवत् नैरन्तर्येणकर्मणा सोमभागं प्राप्नुवन् तेभ्योऽन्तरिक्षस्य वीरेभ्यः अस्माभिः ज्ञानेन सहिता स्तुतिरर्पणीया ।६। ऋभुरस्मभ्यं नवतरः इन्द्रएवास्ति यतो स बलेन धनेन च युक्तत्वाद् इन्द्रवद् धनप्रदोऽस्ति, वयं युद्धे देवानां साहाय्येन अभिमते दिने व्रतहीनान् दस्यून् अभिभवेम ।७। ऋभवः कृशाश्नो वन्यां गां पीवरीं कृत्वा दिने वारद्वयं वत्सेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योजयित्वा बहुदुग्धवतीं कृतवन्तः, यतो मनुष्याः अमृतोपमं दुग्धं प्राप्नुयुः, वृद्धे द्यावापृथिव्यौ च स्तुतिबलेन युवत्यौ कृतवन्तः, यतो मनुष्याः वार्धक्यचिन्तनजनितदुःखैरुपहता न भवेयुः। ८। ऋभुभिर्युक्तः इन्द्रोऽस्मान् स्वबलैः रक्षतु, चित्रं धनं चाऽस्मभ्यं प्रकटयतु, एतदस्माकमभ्यर्थनं मित्रो वरुणोऽदितिः सिन्धुः पृथिवीद्यौश्चाऽऽद्रियन्ताम् ॥ ९ ॥

ऋभवोदेवता भुरिग्जगतीछन्दः। १२।१२।१२।१३

ततं मे अपस्तदुतायते पुनः स्वा-
ष्टिष्ठाधीतिरुचथाय शस्यते। अयं
समुद्र इह विप्रवद्व्यः स्वाहाकृतस्य
समु तृप्णुतऋभवः ॥ १ ॥

ततम्	विस्तारितम्	फैलाया गया है
मे	मया (तृतीयार्थे षष्ठी)	मुझ से
अपः	कर्म्म (निरं०२।१)	कर्म्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्	तत्	वह
ऊम्०	एव	ही
तायते	विस्तार्य्यते	फैलायाजाता है
पुनः०	पुनः	फिर
स्वादिष्ठा	स्वादुतमम्	अत्यन्त मीठा
धीतिः	स्तोत्रम्	स्तोत्र
उचथाय	स्तुत्यै	स्तुति के लिये
शस्यते	उच्चार्य्यते (आ०को०)	उच्चारण किया जाता है
अयम्	अयम्	यह
समुद्रः	समुद्रः	समुद्र
इह	इह	यहां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्ववऽदेव्यः	विश्वे सर्वे देव्याः देवार्हाः (भागाः) यस्मिँस्तथोक्तः ('छन्दसिच, इति तदर्हतीत्यर्थे यत्)	जिस में सब देवताओं के यथायोग्य (भाग) हैं ऐसा
स्वाहाऽकृतस्य	स्वाहाकारेण हुतस्य	स्वाहापद कर होम किये हुए के
सम्	सम्+	–
ऊम्०	(पूरणः)	–
तृप्णुत	सम्+तृप्णुत, संतृप्ता भवत (तृप्लीचने)	आप खूब तृप्त हों
ऋभवः	हे ऋभवः !	हे ऋभुओ !

संस्कृतार्थः ।

हे ऋभवः ! (यत् पूजा-)कर्म्म मया (पूर्वम्) विस्तारितं तदेव पुनर्विस्तार्य्यते (युष्माकम्) स्तुत्यै स्वादुतमं स्तोत्रम् (च) उच्चार्य्यते, अयं सम्पुटरूपः (स्तोमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वेषां देवानामर्थम् (अस्ति) स्वाहाकारेण हुतस्य (अस्य पानेन यूयम्) सन्तृप्ता भवत ॥ १ ॥

भाषार्थः।

हे ऋभुओं ! (जो पूजा का) कर्म (पहिले) मुझसे किया गया था वही (अब) फिर किया जाता है (और आपकी) स्तुति के लिये अत्यन्त मीठा स्तोत्र उच्चारण किया जाता है, यह समुद्ररूप सोम सब देवताओं के लिये (है), स्वाहा के साथ होम किये हुए इस के (पीने से) आप खूब तृप्त होवें ॥ १ ॥

ऋभुओं की कथा के लिये देखो पृष्ठ ३९४।

ऋभवोदेवता जगतीछन्दः। १२।१२।१२।१२

आभोगयंप्रयदिच्छन्तएतना ऽपाकाःप्राञ्चोममकेचिदापयः। सौधन्वनासश्चरितस्यभूमना ऽगच्छत सवितुर्दाशुषोगृहम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राऽभोगयम्	आभोग्यम्, अतिशयेन भोक्तुं योग्यम्, अति स्वादुमित्यर्थः (यस्येतिलोपाभाव श्छान्दसः)	खूब स्वादु
प्र	प्र+	–
यत्	यदा	जब
इच्छन्तः	इच्छन्तः	इच्छा करते हुए
ऐतन	प्र+ऐतन, प्राचरत (इच्छतो-वडि मध्यम बहुवचनस्य यस्य ताडेशेऽते तस्य तनबादेशः)	आप विचरे
अपाकाः	अबालिशाः, चतुरा इत्यर्थः	चतुर
प्राञ्चः	पूर्वकालीनाः	प्राचीन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मम॑	मम	मेरे
१ के	के+	–
१ चि॒त्	के + चित्	कोई
१ आ॒पय॑ः	ज्ञातयः	भाई बन्धु
सौध॑न्व-नासः	हे सुधन्वनःपुत्राः! (जसोऽसुगागमः)	हे सुधन्वा के पुत्रो
च॒रि॒तस्य॑	चरितस्य	जीवन के
भू॒मना॑	भूम्ना, महत्त्वेन (संज्ञापूर्वकस्यविधेरनित्यत्वादलोपाभावः)	महत्त्व से
अग॑च्छत	यूयं प्राप्तवन्तः	आप प्राप्त हुए
१ स॒वि॒तुः	सवितुः	सविता के
दा॒शुष॑ः	दानिनः	दानी के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ गृ॒हम् | गृहम् | घर को

संस्कृतार्थः।

हे सुधन्वनःपुत्राः ! पूर्वकालीनाः चतुराः मम केचन ज्ञातयः (च) यूयं यदा अतिस्वादुम् (सोमम्) इच्छन्तः प्राचरत (तदा) चरितस्य महत्त्वेन दानिनः सवितुर्गृहं प्राप्तवन्तः ॥ २ ॥

भाषार्थः।

हे सुधन्वा के पुत्रो ! प्राचीन चतुर (और) मेरे कोई भाई बंधु आप जब खूब स्वादु (सोम) की इच्छा करते हुए बिचरे (तब) जीवन के महत्त्व से आप दानी सविता के घर को प्राप्त हुए ॥ २ ॥

(१) "मेरे कोई भाई बन्धु" इस लिये कि कुत्सऋषि अङ्गिरा-गोती हैं और ऋभु भी अङ्गिरावंशी सुधन्वा के पुत्र थे।

(२) "सविता के घर को" अर्थात् किरणरूप से सूर्य्यलोक को प्राप्त हुए, देखो पृष्ठ ४०३।

ऋभवोदेवता जगतीछन्दः ।१२।१२।१२।१२

तत्स॑वि॒तावो॑ऽमृत॒त्वमासु॑व॒दगो॑-

ह्यं॒यच्छ्र॒वय॑न्त॒ऐत॑न। त्यंचि॑च्च॒म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समसुरस्यभक्षणमेकंसन्तमक्षणु-
ताचतुर्वयम् ॥ ३ ॥

तत्	तत् (प्रसिद्धम्)	उस (प्रसिद्ध) को
सविता	सविता	सविता ने
वः	युष्मभ्यम्	आप के लिये
अमृतऽत्वम्	अमृतत्वम्	अमरत्व को
आ	आ +	–
असुवत्	आ+असुवत्, दत्तवान् (सा०भा०)	दिया
अगोह्यम्	गूहितुमशक्यम्	जिसको काई नहीं छिपा सकता ऐसे को
यत्	यतः	क्योंकि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ श्रवयन्तः	श्रावयन्तः (छन्दसीवनिपौ०)	सुनाते हुए
ऐतन	गतवन्तःस्थ (थस्थतादेशेतनवादेशः)	आप गए
त्यम्	तम्	उस को
चित्	च	और
चमसम्	चमसम्	चमस को
असुरस्य	त्वष्टुः (सा०भा०)	त्वष्टा के
भक्षणम्	(सोम-) भक्षणोपयोगि (भक्ष्यतेऽनेनेति करणे ल्युट्)	(सोम) भक्षण करने के योग्य को
एकम्	एकम्	एक को
सन्तम्	सन्तम्	बने हुए को
अकृणुत	यूयं कृतवन्तः	आपने किया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुःऽवयम्	चत्वारो वया अवयवा यस्यतितथोक्तम् सा०भा०)	चारभाग वाले को

संस्कृतार्थः।

